"किञ्चिदूनमनूनर्द्धेः शरदामयुतं ययौ"।
"ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा वहिः"।
इति मनुः। ५। ६८॥)

ऊनविंशः, त्रि, ऊनविंशतेः पूरणः। यथा,—
"तिथ्यङ्कवेदैकदशोनविंश-
भैकादशाष्टादशविंशसंख्याः।
इष्टोड़ना सूर्य्ययुतोडुना च
योगादमूश्चेद्दशयोगभङ्गः"॥
इति ज्योतिस्तत्त्वम्॥

ऊनविंशतिः, स्त्री, (एकेन ऊना विंशतिः।) एकोनविंशतिः। ऊनिश इति भाषा। यथा। "ऊनविंशतिदास्यमानपिण्डस्थानानि"। इति तिथ्यादितत्त्वे आमावस्याप्रकरणे॥

ऊम्, व्य (ऊयते। ऊय्+मुक्।) रोषोक्तिः। पृच्छा। इति मेदिनी॥ निन्दा। स्पर्द्धा। इति शब्दरत्नावली॥

ऊमं, क्ली, (अवतीति। अव+"अविसिविमिशुषिभ्यः कित्"। १।१४३। इति उणादिसूत्रेण मन्। कित् ऊठ् च।) देशविशेषः। इति सिद्धान्तकौमुदी॥

ऊय, ई ङ सेवने। तन्तुसन्ताने इति यावत्। इति कविकल्पद्रुमः (भ्वादिं-आत्मं-सकं-सेट्।) दीर्घादिः। सेवनमिह षिव्युतन्तुततावित्यस्य रूपं ई ऊतः। ङ ऊयते पटं सौचिकः। इति दुर्गादासः॥

ऊररी, व्य (ऊय्+बाहुलकात् ररीक्।) विस्तारः। अङ्गीकारः। इति भरतो द्विरूपकोषश्च॥

ऊरव्यः, पुं, (ऊरोर्जातः। ऊरु+शरीरावयवात् यदिति यत्। वैश्यस्य ब्रह्मणः ऊरोर्जातत्वात् तथात्वम्।) वैश्यः। इत्यमरः॥ (यदुक्तं यजुषि। ३१। ११॥
"ब्राह्मणोऽस्य मुखमासीत् बाहूराजन्यः कृतः।
ऊरू तदस्य यत् वैश्यः पद्भ्यां शूद्रोऽजायत"॥ इति॥)

ऊरी, व्य (ऊर+बाहुलकात् रीक्।) विस्तारः। अङ्गीकारः। इत्यमरः॥ (यथा हितोपदेशे विग्रहे। "ऊरीकृत्य प्रस्थितः"॥)

ऊरीकृतः, त्रि, (ऊरी+कृ+क्त।) अङ्गीकृतः। विस्तृतः। इत्यमरः॥

ऊरुः, पुं, (ऊर्णूयते आच्छाद्यते इति। ऊर्णु+(ऊर्णोतेर्नुलोपः। १। ३१। इति उणादिसूत्रेण कर्म्मणि कुः नुलोपश्च।) जानूपरिभागः। उरत् इति भाषा। तत्पर्य्यायः। सक्थि २। इत्यमरः॥ (यथा, साहित्यदर्पणे।
"भुवनत्रितये न बिभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः"।
"भुजमूर्द्धोरुबाहुल्यादेकोऽपि धनदानुजः"।
इति रघुः। १२। ८८। तथा मनुः। १। ३१।
"लोकानान्तु विवृद्ध्यर्थं मुखबाहूरुपादतः"॥)

ऊरुजः पुं, (ऊरोर्जायते इति। ऊरु+जन्+ड।) वैश्यः। स तु ब्रह्मण ऊरुभ्यां जातः। इत्यमरः॥ (यथा, विष्णुपुराणे। १। ६। ४।
रजसा तमसा चैव समुद्रिक्तास्तथोरुजाः"।
भृगुवंशीय ऋषिभेदः। स च और्व्व इति नाम्ना ख्यातः। तस्य जन्मकथा और्व्वशब्दे द्रष्टव्या॥)

ऊरुपर्व्वा, [न्] पुं, स्त्री, (ऊरोः पर्व्वेव।) जानु। इत्यमरः॥ हाँटु इति भाषा।

ऊरुरी, व्य, (ऊर+उरीक्।) विस्तारः। अङ्गीकारः। इति भरतो द्विरूपकोषश्च॥

ऊरुस्तम्भः,पुं, (ऊरू स्तभ्नाति इति ऊरु+स्तन्भ+अण्।) ऊरुरोगविशेषः। यथा। अथोरुस्तम्भाधिकारः। तत्रोरुस्तम्भस्य विप्रकृष्टसन्निकृष्टनिदानसम्प्राप्तिपूर्व्वकं लक्षणमाह।
"शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्न्निषेवितैः।
जीर्णाजीर्णे तथायाससंक्षोभस्वप्नजागरैः॥
सश्लेष्ममेदः पवनः आममत्यर्थसञ्चितम्।
अभिभूयेतरं दोषमूरू चेत् प्रतिपद्यते॥
सक्थ्यस्थिनी प्रपूर्य्यान्तःश्लेष्मणा स्तिमितेन सः।
तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ॥
परकीयाविव गुरू स्यातामतिशयव्यथौ।
ध्यानाङ्गमर्द्दस्तैमित्यतन्द्राच्छर्द्द्यरुचिज्वरैः॥
संयुतौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः।
तमूरुस्तम्भमित्याहुराढ्यवातमथापरे"॥
जीर्णाजीर्णे किञ्चिज्जीर्णे किञ्चिदजीर्णे तस्मिन् भोजनमित्यर्थः। अतएव दृढ़बलेन जीर्णाजीर्णे समश्नत इति पठितम्। तत्र शीतादिभिर्निषेवितैर्भुक्तैः। संक्षोभेण सञ्चलनेन। स्वप्नेन दिवा। जागरणेन रात्रौ। अभिभूय दूषयित्वा। इतरं दोषं पित्तम्। स्तिमितेन आर्द्रेण द्रुतेनेति यावत्। न तु घनेन। एवंविधेन श्लेष्मणा। सः पवनः। तदा ऊरू स्तभ्नाति तेन स्तम्भेन। अचेतनौ शून्यौ। परकीयाविव अक्रियावित्यर्थः। ध्यानं संमूढ़ता। पादसम्बन्धिनीभिः सदनकृच्छ्रोद्धरणसुप्तिभिश्च संयुक्तौ। अयं सुश्रुतेन महावातव्याधिषु पठितः॥*
प्राग्रूपमाह।
"प्राग्रूपं तस्य निद्रातिध्यानं स्तिमितता ज्वरः।
रोमहर्षोऽरुचिश्छर्द्दिर्जङ्घोर्व्वोः सदनं तथा"॥*॥
तस्योपशयमाह।
"वातशङ्किभिरज्ञानात्तत्र स्यात् स्नेहनात् पुनः।
पादयोः सदनं सुप्तिः कृच्छ्रादुद्धरणं तथा॥
जङ्घोरुग्लानिरत्यर्थं शश्वदादाहवेदना।
पदञ्च व्यथते न्यस्तं शीतस्पर्शं न वेत्ति च॥
संस्थाने पीड़ने गत्यां चालने चाप्यनीश्वरः।
अन्यनेयौ हि संभग्नावूरू पादौ च मन्यते"॥
अन्यनेयौ अन्यपुरुषचाल्यौ भवत इत्यर्थः। अज्ञानात् अनिश्चयात् स्तम्भ-सुप्ति-कम्पादि-दर्शनेन। वातशङ्किभिः वातव्याधिशङ्किभिः। तत्र ऊरुस्तम्भे। स्नेहनात् स्नेहादिना स्नेहन्या चिकित्सया। पादसदनादय ऊरुभग्नोपमत्वात् ते विकाराः स्युः। जङ्घोरुग्लानिः जङ्घोर्व्वोर्गमनादावशक्तिः। आदाहवेदना ईषद्दाहेन सह वेदना॥*॥
ऊरुस्तम्भस्यारिष्टं लक्षणमाह।
"यदा दाहार्त्तितोदार्त्तो वेपनः पुरुषो भवेत्।
ऊरुस्तम्भस्तदा हन्यात् साधयेदन्यथा नवम्"॥
अन्यथा दाहाद्युक्तोपद्रवरहितं तमपि नवमुत्पन्नमात्रं साधयेत्॥*॥*॥
अथोरुस्तम्भस्य चिकित्सा।
"स्नेहासृक्स्रावक्मनं वस्तिकर्म्मविरेचनम्।
वर्जयेदाढ्यवाते तु यतस्तैस्तस्य कोपनम्॥
तस्मादत्र सदा कार्य्यं स्वेदनं घनरूक्षणम्।
आममेदःकफाधिक्यान्मारुतं नयता समम्॥
यत् स्यात् कफप्रशमनं न तु मारुतकोपनम्।
तत्सर्व्वं सर्व्वदा कार्य्यमूरुस्तम्भस्य भेषजम्॥
सर्व्वो रूक्षक्रमः कार्य्यस्तत्रादौ कफनाशनः।
पश्चाद्वातविनाशाय विधातव्याखिला क्रि॥
भोज्याः पुराणाः श्यामाककोद्रवोद्दालशालयः।
जाङ्गलैरघृतैर्म्मांसैः शाकैश्चालवणैर्हितैः"॥
उद्दालो वनकोद्रवः।
"दद्याद्वास्तूकशाकेन हीनेन लवणेन तु।
जीर्णशाल्योदनं रूक्षमूरुस्तम्भवते भिषक्॥
रूक्षणाद्वातकोपश्चेन्निद्रानाशादिसम्भवः।
स्नेहस्वेदक्रमस्तत्र कार्य्यो वातामयापहः॥
प्रतारयेत् प्रतिस्रोतः सरितं शीतलोदकाम्।
सरश्च विमलं शीतं स्थिरतोयं पुनः पुनः॥
मूलैर्व्वा वाजिगन्धायाः अथवार्कस्य कारयेत्।
गाढ़मुत्सादनं वैद्य ऊरुस्तम्भे सवेदने॥
त्रिफलाग्रन्थिकव्योषचूर्णं लिह्यात् समाक्षिकम्।
ऊरुस्तम्भविनाशाय पुरं मूत्रेण वा पिबेत्॥
नागरं पिप्पलीञ्चापि गुग्गुलुं वा शिलाजतु।
ऊरुस्तम्भी पिबेन्मूत्रैर्द्दशमूलीरसेन वा"॥
इत्यूरुस्तम्भाधिकारः। इति भावप्रकाशः॥
अपि च।
"त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी।
ऊरुस्तम्भहरो ह्येष उत्तमन्तु विरेचनम्॥
हरीतकीं शृङ्गवेरं देवदारु च चन्दनम्।
क्वाथयेच्छागदुग्धेन अपामार्गस्य मूलकम्॥
जङ्घाश्मूलमूरुस्तम्भं सप्तरात्रे तु नाशयेत्"॥*॥
इति गारुड़े १८७ अध्यायः॥
("एक ऊरुस्तम्भ इति आमत्रिदोषसमुत्थानः"।
इति चरके सूत्रे ऊनविंशोऽध्यायः॥
अस्य सकारणलक्षणसम्प्राप्तिचिकित्सितानि यथा,
"श्रिया परमया ब्राह्मा परया च तपःश्रिया।
अहीनं चन्द्रसूर्य्याभ्यां सुमेरुमिव पर्व्वतम्॥
धीधृतिस्मृतिविज्ञानज्ञानकीर्त्तिक्षमालयम्।
अग्निवेशो गुरुं काले संशयं परिपृष्टवान्॥
भगवन्! पञ्च कर्म्माणि समस्तानि पृथक्तथा।
निर्द्दिष्टान्यामयानान्तु सर्व्वेषामेव भेषजम्॥
दोषजोऽस्त्यामयः कश्चिद्यस्यैतानि भिषग्वर!।
न स्युः शक्ता निशमने साध्यस्य क्रियया ततः॥
अस्त्यूरुस्तम्भ इत्युक्ते गुरुणा तस्य कारणम्।
सलिङ्गं भेषजं भूयः पृष्टस्तेनाब्रवीद्गुरुः"॥*॥
निदानं सम्प्राप्तिलक्षणे च यथा॥
"स्निग्धोष्णलघुशीतानि जीर्णाजीर्णे समश्नतः।
द्रवशुष्कदधिक्षीराग्युग्रानूपौदकामिषैः॥
पिष्टव्यापन्नमद्यातिदिवास्वप्नप्रजागरैः।
लङ्घनाध्यशनायासभयवेगविधारणैः॥
स्नेहाच्चामस्थितङ्कोष्ठे वातादीन् मेदसा सह।